नन्वस्तु नामैवम्, परन्त्वारभ्य बहोः कालादष्टादशाध्यायिन्याः श्रीभगवद्गीतायाः सर्वत्र प्रसिद्धिः, तथाभूतामेव हि तां व्याचाख्युः पूर्वसूरिणश्च शङ्करादयः तत्समयावलंबिनश्च, यदि पुनर्जानन्ति ते चैवंविधां श्रीभगवद्गीतां शुद्धार्यपरिष्कृताम्, तदाऽस्याः स्वस्वसमयविरुद्धत्वेऽपि कथं पूर्वपक्षत्वेनापि स्वकृतभाष्येषु तामेकस्यामपि पङ्क्तौ नालिखन्? तस्मादेवंविधा श्रीभगवद्गीता प्रमाणशरणैर्न स्वीकर्तुमर्हतीति चेत्; उच्यते—न कण्ठे गड्डुरयं प्रश्नो भवितुमर्हति, यतः

श्रीशङ्करादिभिः पूर्वसूरिभिश्च भगवदंशभूतैः लोकश्रेयसे सुपरिष्कृ व्याख्यातानि शास्त्राण्येव प्रमाणानि, एभ्यः पुराणानि शास्त्रा सर्वेभ्यो लोकेभ्यः न त्याज्योपादेयविवेकबोधनक्षमाणीति, ततस्ता प्रमाणानीति च, न वक्तुं शक्यते, यद्यप्रमाणानि तानि, तदा क पुनः शास्त्राणि स्वसमयस्थापने प्रमाणयन्त्युक्ताः पूर्वसूरिणः। एवं किल न्यायवादिभिरुच्यते—तत्तत्समयनिर्वाहकाश्च महावादिनो म त्मानः पूर्वसूरिणः, सर्वसमयमूलभूतं शुद्धमेकं सनातनञ्च धर्मं विवादे प्रकटयन्ति, एकैकसमयवादिनां तेषामार्याणां सर्वसमयमूलस तनधर्मनिरूपणस्य सर्वैक्यविज्ञानस्य च स्वचिकीर्षितप्रबन्धप्र पाद्यविषयनिरूपणप्रतिबन्धकत्वात्। न ते लिखन्ति च र स्वाशयं शिक्षास्वरूपेषु प्रबन्धेषु। परन्तु तेषां हि तत्तत्कालदेश स्वभावानुरूपब्रह्मविद्याशिक्षैव परमो धर्म इति। किञ्च ये तु पुन भागाः सर्वसमयरहस्यविज्ञानपूर्वकमुक्तं सनातनञ्च धर्मं जिज्ञा तेभ्यस्त एव हि पूर्वसूरिणः सर्वविद्याचार्याः स्वशिक्षास्वरूपमित्थं किलावेदयन्ति—

"उपायाः शिक्षमाणानां बालानामुपलालनात्।
असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते॥"

इति। अस्त्यसत्यमिदं वर्त्म, यदाधिष्ठाय ब्रह्मणः नानारू परिकल्पयन्तोऽपि, स्वेष्टतमब्रह्मस्वरूपविज्ञानादिनिष्ठावेशेन तस्यैव

णः रूपान्तरं तद्विषयकविज्ञानादिनिष्ठाञ्च दूषयन्ति पूर्वसूरिणः के-चित्। इदं हि पुनः सत्यं वर्त्म भवति, यदधिष्ठाय मानवाः सर्वमूलं सनातनं धर्मं जानन्ति, इति सत्यासत्यपदार्थं व्याख्याति खण्डरहस्ये भगवांश्च हंसयोगी। श्रूयते हि धर्मद्वैविध्यं प्रवृत्तिर्निवृत्तिरिति। अस्ति च ब्रह्मैव हि सर्वधर्मवाच्यम्, सन्ति च कर्माण्यपि धर्ममूलानि, भवतस्ते वर्त्मनी द्वे सर्वकर्मकरणे। तस्माद्वादिनिग्रहाय पूर्वसूरिभिः तत्तन्मताग्रहेण संप्रसादितेषु प्रबन्धेषु चैवंविधाया गीतायास्त्ववर्ण-नेन ह्यप्रामाण्यकथनं न्यायविरुद्धमिति सम्यग्विज्ञायते। श्रीभगवत्पा-दाचार्यैरपि स्वकृतश्रीभगवद्गीताभाष्योपोद्घातप्रबन्धे तु "भगवान्सृष्ट्वे-दम्" इत्यारभ्य "तद्विवरणे यत्नः क्रियते मया" इत्यन्तैश्च प्रबन्धैः, नरनारायणगीतादियोगगीतान्तानाञ्च गीतानामर्थविशेषाः शब्दतो ह्य-र्थतश्च मनाक्सूचिता भवन्तीति युक्तैश्च प्रमाणैर्बहुभिर्विज्ञायते। किञ्च "नारायणः परोऽव्यक्तात्" इत्यारभ्य "तद्विवरणे यत्नः क्रियते मया" इत्यन्ताश्च प्रबन्धा एव श्रीशङ्करभगवत्पादविरचिता इति, ततः परे च प्रबन्धाः समुपलभ्यमानाः श्रीशङ्कराचार्याऽप्रणीता इति, श्री शङ्करविरचितगीताभाष्यञ्चान्यदाधुनिकैश्शुद्धाद्यैस्सुसंरक्षितमस्तीति च विज्ञायते। यच्चात्र वक्तव्यं तदस्मद्गीताभाष्यखण्डरहस्योपोद्घात-प्रबन्धे विशेषतो ह्यभिवर्णितं भवति। तस्मात्प्रमाणशरणैः पुनरेषा शुद्धाचार्यसुपरिष्कृता श्रीभगवद्गीता स्वीकार्या भवत्येव।

तत्र च प्रथमे ह्यध्याये, सर्वेषां संसारिणां तदीशानाञ्च तत्तत्काल

देशोचितकर्तव्याभ्युदयसाधनतमस्वस्वरूपानुरूपकर्मनिष्ठाधिकारसंपा
नार्थम्, भगवता प्रथमं हि समुपदिष्टो भवति सर्वावश्य
मुख्यश्च ब्राह्मथाः शक्तेः स्वीकारः।. ततस्तथाभिहितश्च, शक्तानां ह्य
कारिणाम्, व्यवसायेषु, स्वस्वरूपानुरूपे च कर्तव्ये कर्मणि, पर
तत्तत्कालावश्यकस्वस्थानानुरूपकर्तव्यधर्मविद्याविवादावश्यकत्वम्, त
त्यदिव्योक्तिप्रत्युक्तिभिः। ततस्समुपदिष्टं च भवति सर्वाधिकार
ब्राह्मोपनयनाङ्गभूतं सदाचार्यसमाश्रयणञ्च सशिष्यलक्षणम्।
चारभ्य द्वितीयाध्यायादध्यायानां चतुर्विंशतिभिः, गायत्र्यर्थवाच्य
सर्वसांसारिकजनस्वानुरूपव्यवसायाधिष्ठानभूतानाञ्च तत्वचतुर्विंशत
तथा तत्तत्वानां प्रत्येकमधिष्ठितस्य पुरुषस्य च स्वरूपम्, य
धिकारं यथाक्रमं सरहस्यं सुसङ्गतञ्च समुपदिष्टं भवति भग
श्रीवासुदेवेन। अथाध्याये च षड्विंशे, एवं सर्वतत्वार्थोपदेष्टरि सव
तमे च तस्मिन् भगवति शिष्यभावमापन्नेनार्जुनेन सविज्ञानं सकार्त
प्रोक्तः परब्रह्मस्वरूपश्रीकृष्णस्तवराजः, तथा श्रीगीतोपदेशस
तत्वार्थविज्ञानार्थं समुपागतानां च सर्वेषामधिकारिणामुत्तमेनाधिका
ब्रह्मदेवेन संप्रोक्तः स्वसदाचार्यप्रसादसमुपलब्धदिव्यचक्षुष्मता
महायोगिना सञ्जयेन स्वस्वरयोगेनोपलब्धः, तेनैव च सर्वार्थभा
भावस्वरूपविवेकनिष्ठाविधुराय तत्वजिज्ञासवे च राज्ञे जात्यं
धृतराष्ट्राय सकृपावगाढं समुपदिष्टश्च स्तवराजः प्रतिपादितो भवा
अत्र च भगवान्नारदः—

" पुरा भगवता प्रोक्ता या गीता योगलक्षणा ।
सा हि षड्विंशदध्यायैः गुंभिता कृष्णयोगिना ॥

आद्यन्ताभ्याञ्च व्याख्यातो ह्यध्यायाभ्यां महामनुः ।
प्रणवश्च यथातत्वं तदर्थश्चेत्थमेव हि ॥

आद्यो यः प्रणवः प्रोक्तः सर्वविद्यासु तस्य हि ।
देवी ब्राह्मी महाशक्तिः प्रथमं तत्वमुच्यते ॥

विद्या सांसारिकी सा च द्वितीयं तत्वमुच्यते ।
भास्वता ज्ञानदीपेन नाशयन्भूतभावनः ॥

अज्ञानजं तमः कृत्स्नमात्मभावस्थितः परः ।
सोऽयं पुमान्तृतीयं स्यात्तत्त्वमित्यवधार्यताम् ॥

स्वीकारश्च तथा चर्चा प्रातिश्चैव यथाक्रमम् ।
त्रयाणामुक्ततत्वानामर्थो विद्यावतां भवेत् ॥

समष्टिव्यष्टिरूपञ्च सर्वमूलं सनातनम् ।
कारणं विश्वरूपञ्च सर्वातीतं गुहाशयम् ।

अन्त्यप्रवणवाच्यं स्यादात्मानात्मस्वरूपवत् ।
चत्वारि चास्य तत्त्वानि तत्स्वरूपमिदं शृणु ॥

ज्ञानमिच्छा क्रिया चैव समाहारस्तथा परः ।
प्रयोजनन्तथैतेषामित्थं ज्ञेयं मनीषिभिः ॥

ज्ञानं ध्यानं तथा कर्म शुद्धं विज्ञानमेव च ।
इत्यध्याये च षड्विंशे स्तुतं ब्रह्म परावरम् ॥"

इति प्रथमचरमाध्यायविज्ञानप्रयोजनं सम्यगभिहितं भवति
इत्थं हि किल शुद्धाचार्याः भीष्मपर्व सविमर्शं परिष्कुर्वन्ति—
भगवद्गीता हि महाभारते षष्ठे भीष्मपर्वणि ग्रथिता भवति कृ
द्वैपायनेन । भीष्मपर्व हि—

"जंबूखंडविनिर्माणं पर्वोक्तं तदनन्तरम् ।
दिव्यं चक्षुर्ददौ यत्र सञ्जयाय महामुनिः ॥
भूमिपर्व ततः प्रोक्तं द्वीपविस्तारकीर्तनम् ।
पर्वोक्तं भगवद्गीता पर्व भीष्मवधस्ततः ॥"

इति भारतादिपर्ववचनादेव ह्यवान्तरपर्वभिश्चतुर्भिरन्वितं भव
तथा तद्भीष्मपर्वाध्यायश्लोकसंख्याश्च—

"अध्यायानां शतं प्रोक्तं तथा सप्तदशापरे ।
पञ्चश्लोकसहस्राणि संख्ययाऽष्टौ शतानि च ॥
श्लोकाश्च चतुरशीतिरस्मिन्पर्वणि कीर्तिताः ।"

इति भारतवचनादेव संप्रदर्शिता भवन्ति । तथा भीष्मप
प्रत्यवान्तरपर्व चाध्यायानां हि संख्या गोभिलकारिकायाम्—

"आद्ये च गदिता ह्यष्टावध्यायाश्च महर्षिणा ।
एकोऽध्यायो द्वितीये हि तेन प्रोक्तश्च पर्वणि ॥

अध्यायानां तृतीये हि त्रयस्त्रिंशत्ततः परम् ।
अध्यायानां चतुर्थे हि पञ्चसप्ततिरादृता ॥"

इति संप्रतिपादिता भवतीति । इत्थं हि किल भगवद्गीतापर्वविषयानुक्रमणिका—"अथ गावल्गणिर्विद्वान्" इत्यारभ्य "एतान्यनीकानि महानुभावम्" इत्यन्तेनाध्यायषट्केण कुरुपाण्डवसेनासन्निवेशप्रकारः समुपपादितो भवति । ततो "धर्मक्षेत्रे कुरुक्षेत्रे" इत्यारभ्य हि "यत्र योगीश्वरः कृष्णो" इत्यन्तेनाध्यायानां च षड्विंशत्या साङ्गा च श्रीभगवद्गीता सूपपादिता भवति, ततश्चैकेनाध्यायेन च चरमेण गीतावैभवः प्रतिपादित इति । तथा च भीष्मपर्वणि चत्वार्यवान्तरपर्वाणि, सप्तदशाधिकशतसंख्या ह्यध्यायाः, चतुरशीत्युत्तराष्टशताधिकपञ्चसहस्रश्लोकाश्च सन्तीति हि विज्ञायते महाभारतवचनात् । वर्तमानभारतकोशेषु चैवं न दृश्यते । सत्येवं प्रमाणशरणाः श्रीमहाभारतरहस्यार्थविवेकजिज्ञासवः किं करिष्यन्ति । सुपरिष्कृतश्च महाभारतप्रबन्धः संरक्षितोऽस्ति शुद्धार्यैरिति हि विज्ञायते । एवं सुपरिष्कृतैव श्रीभगवद्गीता तथा परिष्कृतमहाभारतान्तर्गता भवतीति सप्रमाणं निरूपयति भगवान्हंसयोगी खण्डरहस्ये गीताभाष्ये । तस्माच्छुद्धार्यविद्यापरिष्कार एव तत्तात्पर्यविषयो भवतीति तु समञ्जसमेव । अस्यां षड्विंशतिभिरध्यायानां यथाक्रमं—गीतावतारः, नरनारायणधर्मः, अवतारधर्मः, आधिकारिकधर्मः, अधिकारिविद्याशिक्षाधर्मः, कारणविज्ञानधर्मः, तद्विज्ञानिनां प्राप्यकैवल्यधर्मः, एवं प्रथमज्ञान-

काण्डषट्कनिष्ठानां स्वरूपनिरूपकधर्मः, तेषां साधनत्रयविज्ञानधर्मो ह्यधिकाररूपः, एवं साधनत्रयनिष्ठानां शिक्षारूपो मायाधर्मः, तथा शिक्षितानां प्राप्तिकारणमोक्षधर्मः, तथा मुमुक्षूणां ध्येयकैवल्यनाथ-ब्रह्मस्वरूपधर्मः, स्वसत्यसङ्कल्पेन बहुधा विजायमानत्वरूपनरनारा-यणधर्मः, एवं द्वितीयकाण्डषट्कनिष्ठानां कर्मनिष्ठारूपप्राणायामधर्मः, तेषां विज्ञेयश्च परमात्मधर्मः, तथा चाक्षरधर्मः, तद्विद्याधर्मः, परमहंसा-धिकारधर्मः, स्वसंन्यासधर्मः, एवं तृतीयकाण्डषट्कनिष्ठानां योगहेतुश्च आत्मधर्मः, तथा प्रकृतिधर्मः, तत्ताद्विशेषकर्मधर्मः, तथा ज्ञानधर्मः, तथा सर्वकाण्डनिष्ठासमधिगम्ययोगधर्मः, ब्रह्मस्वरूपविज्ञानधर्मः स्तुतिरूपश्च गदितो भवतीति विज्ञेयम् । एवं चतुर्विंशतीनां गीतानां पादचतुष्टयनियमेन प्रथमे ज्ञानपादे षडध्यायाः, तथा द्वितीये सङ्कल्पपादे, तृतीये कर्मपादे, तुरीये योगपादे चाध्यायसंख्या-नियमः । अध्यायस्य काण्ड इति व्यवहारश्च शुद्धार्यसमय-सिद्धः । तदुक्तं रामायणखण्डरहस्ये हंसयोगिना—“ नरनारायण-धर्मः प्रथमे बालकाण्डे, द्वितीये ह्ययोध्याकाण्डे चावतारधर्मः, तृतीये पुनरारण्यकाण्डे ह्यधिकारधर्मः, चतुर्थे किष्किन्धाकाण्डे शिक्षाधर्मः, पञ्चमे च काण्डे सुन्दरे कारणविज्ञानधर्मः, षष्ठे पुनर्युद्धकाण्डे कै-वल्यधर्मः, प्रतिपादमेते धर्माः भिन्नक्रियार्थाः विपरिणमन्ते, विशेषतो ह्यध्येयत्वेन काण्डानामध्याय इति व्यावहारमाचरति नारदः, तत्त-त्वार्थप्रकाशको हि काण्डो विज्ञायते, श्रीभगवद्गीतापि षट्का-

ण्डपादचतुष्टयवती भगवती शुद्धयोगब्रह्मविद्या भवति" इति किञ्चास्यां भगवान् हंसयोगी, प्रतिपादमेते धर्माः भिन्नक्रियार्थाः वि रिणमन्ते इत्यत्र—

"नरनारायणाद्याश्च कैवल्यान्ता महर्षयः ।
प्रतिपादं षडेते च धर्मा भिन्ना विभांति हि ॥"

इति नारदवचनं प्रमाणयति ।

"एवं काण्डषट्केऽपि श्रीरामायणे पादचतुष्टयनियमः, यथ पादमुक्तकाण्डषट्कनियमश्च दृश्यते । नरनारायणधर्मादयश्च षडे प्रतिपादं यथाधिकारं विशेषनिष्ठया भिन्ननामानो विपरिणमन्ते । तथ हि—नरनारायणधर्मविज्ञानात्स्वरूपध्याननिष्ठाविज्ञानम्, तस्मात्प्राण यामकर्मनिष्ठाविज्ञानम्, तस्मादात्मयोगनिष्ठाविज्ञानञ्च भवति । एव मवतारधर्मविज्ञानात्स्वरूपानुरूपसाधनत्रयनिष्ठाविज्ञानम्, तस्मात्प मात्मविज्ञाननिष्ठा, तस्याः प्रकृतिधर्मविज्ञाननिष्ठा च सञ्जायते । तथ ऽधिकारविज्ञाननिष्ठायाः मायाविज्ञाननिष्ठा, तस्याः अक्षरविज्ञाननिष्ठ तस्याः कर्मनिष्ठा च संभवति । एवं शिक्षास्वरूपविज्ञानान्मोक्षस्वरूप विज्ञाननिष्ठा, तस्याः राजविद्याविज्ञाननिष्ठा, तस्याः भक्तिस्वरूप विज्ञाननिष्ठा च समुत्पद्यते । एवं च कारणविज्ञाननिष्ठाया ब्रह्मस्वरूपविज्ञाननिष्ठा, तस्याः परमहंसविज्ञाननिष्ठा तस्याः शुद्ध विज्ञाननिष्ठा च प्रभवति । एवं कैवल्यनिष्ठायाः ब्रह्मविभूतिविज्ञानम् तस्मात्संन्यासधर्मविज्ञाननिष्ठा, तस्याः योगनिष्ठा च संभवत्यधि

कारिणाम् ” इति श्रीरामायणखण्डरहस्ये षण्णां नरनारायणधर्म दीनां यथापादमुक्तं विपरिणामं व्याजहार भगवान् हंसयोगी तस्माच्चतुर्णां संसारिणां ज्ञानभक्तिकर्मयोगनिष्ठानां यथावस्थं विज्ञेर ह्यर्थविशेषाश्च षट्प्रकाराः श्रीभगवद्गीतायामस्यां श्रीकृष्णमूर्तिन “ अशोच्यानन्वशोचस्त्वम् ” इत्यारभ्य “ मोक्षयिष्यामि मा शुचः इत्यन्तैः षट्सप्तत्युत्तरपंचशतैश्च श्लोकैः प्रतिपादिता भवन्तीि विज्ञेयम् । एवं भगवदुपदिष्टां तत्वार्थपरां च योगब्रह्मविद्यां श्रीभगव द्गीतां तत्वजिज्ञासवे राज्ञे धृतराष्ट्राय प्रोवाच महायोगी संजयः, इि मध्येमहाभारतं गीतावतारसङ्गतिर्विज्ञेया भवति मुमुक्षुभिः पर प्रेप्सुभिः ।

कावेतौ भगवन्तौ योगब्रह्मविद्याप्रकटने गुरुशिष्यस्थानमधिष्ठितं कृष्णार्जुनौ इति शंकायामित्थं हंसयोगी—

“ कृष्णार्जुनौ महादेवौ विद्धि तौ धर्मनायकौ ।
नारायणनरांशौ च* महाभारतसंस्तुतौ ॥ ”

इति सनातनधर्मदीपिकायामाह । किं च श्रीकृष्णशब्दार्थश्च—

---

* पार्थकृष्णयोर्नरनारायणस्वरूपत्वं च महाभारते आदिपर्वणि चतुष्षष्टितमे ऽध्याये, वनपर्वणि चतुरशीतितमेऽध्याये, उद्योगपर्वणि एकोनपञ्चाशेऽध्याये भीष्मपर्वणि त्रयोविंशेऽध्याये, अष्टषष्टितमेऽध्याये च, अनुशासनपर्वणि द्विपञ्चाशदधिकद्विशततमेऽध्याये च, प्रतिपादितं भवति ।

"कृषिर्भूवाचकश्शब्दो णश्च निर्वृतिवाचकः ।
विष्णुस्तद्भावयोगाच्च कृष्णो भवति सात्वतः ॥"

इति महाभारतोद्योगपर्वणि एकोनसप्ततितमेऽध्याये निरूपितो भवति । ततः सर्वसंसारव्यवसायधर्मगोप्ता हि श्रीकृष्ण इति विज्ञायते ।

अत एव महाभारतादिपर्वणि प्रथमाध्याये "यस्य प्रसादाद्वक्ष्यामि नारायणकथामिमाम्" इति सौतिः प्रतिज्ञाय

"भगवान्वासुदेवश्च कीर्त्यतेऽत्र सनातनः ।
स हि सत्यमृतं चैव पवित्रं पुण्यमेव च ॥

शाश्वतं ब्रह्म परमं ध्रुवं ज्योतिः सनातनम् ।
यस्य दिव्यानि कर्माणि कथयन्ति मनीषिणः ॥"

इत्यनुशास्ति । अतो नरनारायणश्रीकृष्णप्रोक्तधर्म एव प्रतिपाद्यत्वेन विषयो भवतीति विज्ञायते । अत्र च "यस्य सङ्कल्पनायकस्य भगवतो वासुदेवस्य दिव्याणि कर्माणि सर्वसंसारव्यवसायधर्मस्वरूपोपदेशरूपाणिच, सत्यं च धर्म ऋतं च धर्म पवित्रं च धर्म पुण्यं च धर्म शाश्वतब्रह्मपरध्रुवज्योतिस्वरूपसनातनधर्म च ज्ञानिनां कथयन्ति, धर्माः षडेते नरनारायणधर्मादीनां च षण्णां धर्माणां जीवरूपा भवन्ति" इति खण्डरहस्यम् । तस्मात्प्रतियुगं धर्मसंरक्षणार्थं नानारूपेणाऽवतीर्णौ पार्थपार्थसारथी, नरनारायणाविति विद्वद्भिः विज्ञेयम् ।

एवं रीत्यैव हि गीताश्चान्याश्चतस्त्रः शुद्धैरभ्युपगम्यते । ताश्च पुन
—श्रुतिगीता तैत्तरीयारण्यकान्तर्गता, ब्रह्मगीता ईशावास्यादिसौ
भाग्यलक्ष्मीपर्यन्तानामेकोनपंचाशदामुपनिषदामन्तर्गता, ततश्चार्षगीत
श्रीरामायणांतर्गता, शुद्धगीता शुद्धार्यपरिष्कृतदेवीभागवतान्तर्गता इ
भवन्ति । ब्रह्मगीतोपनिषदः (१) ईशावास्य, (२) कठ, (३) केन, (४
प्रश्न, (५) मुण्डक, (६) माण्डूक्य, (७) तैत्तरीय (८) ऐतरेय (९
छांदोग्य, (१०) बृहदारण्यक (११) कैवल्य, (१२) ब्रह्म (१३
श्वेताश्वतर, (१४) हंस, (१५) नारायण (१६) परमहंस, (१७
मैत्रेयी (१८) सर्वसार (१९) निरालंब (२०) वज्रसूची (२१
तेजोबिंदु (२२) नादबिंदु (२३) ध्यानबिंदु (२४) ब्रह्मविद्या (२५
योगतत्व (२६) आत्मबोध (२७) नारदपरिव्राजक (२८) त्रिशि
खिब्राह्मण (२९) सीता (३०) दक्षिणामूर्ति (३१) निर्वाण (३२
मण्डलब्राह्मण (३३) संन्यास (३४) अव्यक्त (३५) अध्यात्म (३६
आत्म (३७) देवी (३८) रामरहस्य, (३९) स्कन्द, (४०) मह
नारायण, (४१) सूर्य (४२) रुद्रहृदय, (४३) भावना, (४४) पंच
ब्रह्म, (४५) कृष्ण, (४६) वराह, (४७) मुक्तिक, (४८) कलिस
तरण (४९) सौभाग्य, इति प्रसिद्धाः एकोनपञ्चाशदो भवंति ॥

—प्रकृतमनुसरामः एवं शुद्धार्यसुपरिष्कृता श्रीभगवद्गीतापि क
चिदस्तीति प्रथमं ह्यस्मदार्यमातामहादेवावगतम् । अस्मन्मातामहः
शुद्धधर्मसमर्थ इति सर्वत्र विदितमेव । अत्र वक्तव्यमन्यदितिवृ

सनातनधर्मदीपिकोपोद्घातप्रबन्धे 'नाकयोगी तथाऽर्जुनः' इत्यस्य सविमर्शमर्थनिरूपणावसरे निरूपितं भवत्यस्माभिः। स च मातामहः तिरुविन्दलूर् श्रीमदुभयश्रीवेङ्कटाचार्याख्यः, गीतायाश्चास्याः स्वानुसन्धानार्थं श्लोकपादानुक्रमणिकां काञ्चिदलिखत्, तदवलंब्य, तथा स्वामियोगानन्दशङ्करानन्दभवानन्दानां अन्येषां शुद्धार्याणां कोशांश्चावलंब्य सुपरिष्कृतेयं। तामिमां हि भगवतीं योगब्रह्मविद्यां भगवद्गीतां, सारासारविवेकिपरिबृढाः अत्रत्यशुद्धधर्ममण्डलकार्यदर्शिनः डाक्टर् सर्. यस्. सुब्रह्मण्यार्या एव प्रथमं विदुषां सतां मनः समानेतुमैच्छन्। तदनुरूपमिदं सच्च कैङ्कर्यमस्माकम्, यन्मुद्रापयित्वेमां विख्यापनम्। समये हि गोभिलकारिकाश्चापि शुद्धार्यैरस्माकं प्रेषिता अभवन्। साकं चैत्र भगवद्गीतया योगब्रह्मविद्यया ह्येताः महर्षिगोभिलशुद्धादिव्यप्रतिभाप्रसूताः शुभार्थाश्च समायाता भवन्ति ॥

तस्मादिमां भगवतीं योगब्रह्मविद्यां शुद्धसमया वयं समधिगम्य सुकृतार्था भवेम, इत्यस्माभिः सर्वेश्वरस्सर्वसाक्षी च भगवान् सर्वात्मस्वरूपः श्रीवासुदेवः प्रार्थ्यते ॥

श्रीकृष्णं परमात्मानं शरणागतवत्सलम् ।
धर्मद्वयोपदेष्टारं ब्रह्मतत्सन्नतोऽस्म्यहम् ॥

इत्थम्
श्रीशुद्धार्यदासः
पण्डित के. टि. श्रीनिवासाचार्यः

शुद्धयोगब्रह्मविद्यायाः

श्रीभगवद्गीतायाः

पारायणक्रमः

भरद्वाज उवाच

सुब्रह्मण्य महाभाग नमस्ते लोकनायक ।
कथं योगब्रह्मविद्या गीताऽध्येया मनीषिणा ॥ १ ॥

का वा गीतोचिता पूजा कदा सेव्याऽस्ति सा सता ।
ज्ञातुमिच्छाम्यशेषेण वदस्व कृपया विभो ॥ २ ॥

सुब्रह्मण्य उवाच

भरद्वाज महाभाग पृष्टन्तुभ्यं वदाम्यहम् ।
युगे युगे तु भगवान्नारदाय महामुने ॥ ३ ॥

गीतासेवां यथातत्वं व्याजहार युगप्रभुः ।
तामेवाद्य प्रवक्ष्यामि शृणुष्व मुनिपुङ्गव ॥ ४ ॥

दासः काल्ये समुत्थाय कृत्वा स्वाह्निकमुत्तमम् ।
प्रक्षाल्य पाणिपादश्च धृताकल्पः प्रसन्नधीः ॥ ५ ॥

तिष्ठन्बद्धाञ्जलिर्देवमात्मानं परिबुध्य हि ।
सङ्कल्पनायकश्चैवं प्रणमेद्भक्तिभावतः ॥ ६ ॥

सङ्कल्पनायकस्तवः ।

श्रीं देवीं तां योगदेवीन्तत्सङ्कल्पप्रभुं नरम् ।
शुद्धसङ्कल्पनाथञ्च नारायणमुपास्महे ॥ ७ ॥

लोकाधिकारिणश्चान्यान्नारदाद्यानृषीन्वयम् ।
तथा प्राचीनहंसांश्च प्रणमामो यथाबलम् ॥ ८ ॥

श्रीकृष्णार्जुनध्यानस्तवः

नरनारायणाज्जातौ जगतस्स्थितये स्थितौ ।
शुद्धसङ्कल्पनाथौ च वन्दे कृष्णार्जुनौ सदा ॥ ९ ॥

एवमुक्त्वा प्रणम्याथ गायत्रीन्यासमाचरेत् ।

तदित्थम् ।

अस्याः श्रीयोगविद्यायाः भगवद्गीतायाः नरनारायणऋषिः, गायत्री छन्दः, श्रीयोगब्रह्मविद्या देवता, योगब्रह्मविद्याप्रसादसिध्यर्थे गीतापारायणक्रियाजपे विनियोगः ।

ध्यानम् ।

चतुष्पदीं धर्मविद्यां समत्वं गिरतीं सतीम् ।
परसामीप्यफलदां वन्दे गीतां शुभावहाम् ॥ १० ॥

षड्दर्शनपदां दिव्यां सर्वभावसमन्विताम् ।
कर्तव्यव्यवसायस्य निश्चयाय नतोऽस्म्यहम् ॥ ११ ॥

इति स्तुत्वा पुनर्बद्धाञ्जलिपुटः,

नमस्ते नरदेवाय नमो नारायणाय च ।
बदरीवननाथाय योगिनां पतये नमः ॥ १२ ॥

इति ध्यात्वा गीताकोशञ्च यथाशक्ति समभ्यर्च्य,

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ १३ ॥

इति श्लोकपठनपूर्वकं श्रीभगवद्गीतां पठेत् ।

श्रीभगवद्गीतापारायणसमाप्तौ कर्तव्यविधिः । श्रीभगवद्गीताञ्च भक्त्या यथोचितं पठित्वा ततश्चोत्थाय पुनरपि,

"नारायणं नमस्कृत्य०

"चतुष्पदीं धर्मविद्यां०

"षड्दर्शनपदां दिव्यां

इति स्तुत्वा तत्फलं भगवते तस्मै समर्पयेत्

इति गीतापारायणक्रमः समाप्तः

ॐ नमः श्रीपरमर्षिभ्यो योगिभ्यः

महर्षिगोभिलविरचितः

गीतार्थसंग्रहः॥

तत्र

प्रथमोऽध्यायः

शुद्धधर्ममण्डलस्य धर्मशास्त्रं सनातनम् ।
यच्च गीताभिधं तद्वै व्याख्यास्यामो यथामति ॥ १ ॥

श्रीकृष्णवदनाम्भोजगलिताशेषतापनुत् ।
गीता चकास्ति षड्विंशदध्यायैरन्विता परा ॥ २ ॥

आद्ये गीतावतारोऽयमध्याये परिकथ्यते ।
पूर्तिं समेष्यति स्वात्तसङ्कल्पे कर्म चक्रतुः ॥ ३ ॥

स्वप्रधानपरं शुद्धं नरनारायणौ प्रभू ।
शुद्धसङ्कल्पनाथौ च तन्निबोधत वै द्विजाः ॥ ४ ॥

प्रारब्धे भारते युद्धे कृष्णो नारायणो विभुः ।
कार्यदर्शिनमाराध्यं नरं स्वांशं तथाऽर्जुनम् ॥ ५ ॥

आहूय पूर्वं तां ब्राह्मीं शक्तिं तस्मै समादिशत् ।
यां हि लोकास्तदीशाश्च प्राप्य स्वार्थप्रसादतः ॥ ६ ॥

व्यवसायं प्रकुर्वन्ति स्वकीयं सफलं भुवि ।
द्विविधश्च परा ब्राह्मी सा नाना परिकथ्यते ॥ ७ ॥

सर्वेषां कर्मणां सैव जीवभूता चकास्ति हि ।
द्विधाभूतस्तथा शक्त्या निवृत्तेश्च प्रवृत्तितः ॥ ८ ॥

दैवीं शक्तिं निवृत्तश्च प्रवृत्तश्चासुरीन्तथा ।
आदधानश्च पार्थोऽयं लोकप्रतिनिधिर्गुरुः ॥ ९ ॥

लोकानाञ्च सुखं दुःखं सांसारिकमवेक्ष्य हि ।
कृपया परयाऽऽविष्टो शिष्यलक्षणलक्षितः ॥ १० ॥

जिज्ञासुस्तन्निवृत्तेश्च ह्युपायं योगशास्त्रतः ।
शुद्धसङ्कल्पनाथञ्च कृष्णन्तं शरणं ययौ ॥ ११ ॥

इत्येवं प्रथमाध्यायसंग्रहार्थः प्रकीर्तितः ।

द्वितीयोऽध्यायः ।

ततो भगवता तेन नारायणमहर्षिणा ॥ १२ ॥

कृष्णेन शुद्धसङ्कल्पकार्यकर्त्रेऽधिकारिणे ।
गायत्रीलक्षणा गीताः कथितास्तत्वदर्शनाः ॥ १३ ॥

पार्थाय लोकशास्त्रे च सोल्लासं सविमर्शनम् ।
नरनारायणधर्मगीताऽऽद्या तत्र कीर्तिता ॥ १४ ॥

अध्याये च द्वितीयेऽस्याः प्रेप्सुभिश्च परं पदम् ।
मुमुक्षुभिः सुसेव्या स्यादवश्यं मुनिपुङ्गवाः ॥ १५ ॥

तृतीयोऽध्यायः ।

गीतायाश्च तृतीयेऽस्मिन्नध्याये कृष्णयोगिना ।
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ॥ १६ ॥

धर्मसंरक्षणार्थाय यथादेशं यथायुगम् ।
शुद्धसङ्कल्पनाथार्च्यनारायणमहात्मना ॥ १७ ॥

रहस्यं ह्यवताराणां स्वीकृतानां यथायथम् ।
व्याख्यातं सप्रकारञ्च तद्धि सेव्यं महर्षिभिः ॥ १८ ॥

चतुर्थोऽध्यायः ।

अध्यायेऽस्यास्तुरीये हि वासुदेवेन धीमता ।
अवतारसुसाध्याश्च ह्यधिकारा निरूपिताः ॥ १९ ॥

तत्र हि क्रमशः शुद्धसङ्कल्पेशपरात्मनः ।
ज्ञानिनाञ्चैव भक्तानां कर्मठानां यतात्मनाम् ॥ २० ॥

समाहारपराणाञ्च योगिनां हि महर्षयः ।
अधिकारो यथारूपं सप्रकारो निरूपितः ॥ २१ ॥

पञ्चमोऽध्यायः

अध्याये पञ्चमेऽस्यास्तु वेद्यो योऽर्थोऽधिकारिभिः ।
शिक्षारूपः स कथितः साङ्गं श्रीकृष्णमूर्तिना ॥ २२ ॥

तत्र च क्रमशः शुद्धविज्ञानस्याधिकारिणः ।
सर्वमूलपरब्रह्मस्वात्मविज्ञानपूर्वकम् ॥ २३ ॥

स्थितप्रज्ञस्य निष्ठा च त्याज्योपादेयधीस्तथा ।
आत्मनो लक्षणञ्चैव सर्वोपास्यस्य वै तथा ॥ २४ ॥

स्थानञ्चैव यथातत्वं सप्रकारमुदाहृतम् ।
तद्वै स्थानं योगिभिश्च वेद्यं स्यादिति निर्णयः ॥ २५ ॥

षष्ठोऽध्यायः

षष्ठेऽध्याये तु गीतायाः शिक्षया शिक्षितस्य हि ।
उक्तया च परं वेद्यं परमं सर्वकारणम् ॥ २६ ॥

वर्ण्यते वस्तु देवेन नारायणमहर्षिणा ।
यच्च वा पुण्यपापानां परप्राप्तेश्च साधनम् ॥ २७ ॥

अत्र यत्कर्म चास्माभिः क्रियते सदसच्च यत् ।
तस्य सर्वस्य चोक्तानि कारणानीति बुध्यते ॥ २८ ॥

परन्तु पञ्चमस्तत्र पुरुषः प्रकृतेः परः ।
अन्तरात्मात्मभावो हि शुद्धयोगेन देहिनम् ॥ २९ ॥

चरन्तं गुणयोगेन स्वांशं शुद्धं स्वतो विभुम् ।
विद्योतितेषु सर्वेषु कर्मस्वेवं नियोजयन् ॥ ३० ॥

सर्वस्वभावयुक्तो यो ह्यस्ति सर्वत्र निर्मलः ।
तस्य विज्ञानमेव स्यात्परप्राप्तिसुसाधनम् ॥ ३१ ॥

प्रवृत्तेश्च निवृत्तेश्च व्यवसायं करोति यः ।
स एव पश्यति प्राज्ञः जगतां कारणं परम् ॥ ३२ ॥

कारणं तत्परं ब्रह्म परमात्मा सचाक्षरः ।
आत्मा जीव इति प्राज्ञैः कथ्यते धर्मवर्त्मसु ॥ ३३ ॥

चतसृभिश्च देवीभिः युक्तन्तद्धियते सदा ।
तदेव चान्नमन्नादमिति भाति स्वभावतः ॥ ३४ ॥

तत्कारणं परं वस्तु व्यवसायद्वयस्य हि ।
सिध्यर्थं परिपूर्त्यै च योगिनः समुपासते ॥ ३५ ॥

ध्येयं यत्कारणत्वेन स्वरूपाच्च स्वभावतः ।
शुद्धं तद्ब्रह्म विज्ञानात्सर्वभावोपशोभितम ॥ ३६ ॥

अशुद्धमिश्रसत्वानाङ्कार्याणामीश्वरा गुणाः ।
गुणैर्विना न कर्ता स्यात्सोऽयमात्मा गुणात्परः ॥ ३७ ॥

इति कारणविज्ञानं पुरुषार्थसुसाधनम् ।
व्याख्यातं कृष्णदेवेन चैतद्ध्येयं मुमुक्षुभिः ॥ ३८ ॥

अथ सप्तमोऽध्यायः

कारणज्ञानिभिर्वध्यो ह्यहङ्कारो दुरासदः ।
ततः कैवल्यमध्याये सप्तमेऽस्मिन्निगद्यते ॥ ३९ ॥

आत्मविज्ञानमेव स्यात्कैवल्यं योगलक्षणम् ।
आत्मा कैवल्यनाथः स्यात्परं ब्रह्म सनातनम् ॥ ४० ॥

स्वरूपं ब्रह्मणस्तस्य प्रथमं ह्यभिवर्णितम् ।
यश्च सर्वाणि भूतानि चैकमूलानि पश्यति ॥ ४१ ॥

स कैवल्यमवाप्नोति शुद्धं संन्यासलक्षणः ।
आत्मानात्मविवेकेन स्वधर्मेण च योगतः ॥ ४२ ॥

संसारस्य स्वरूपं हि सत्वमूलं गुणैर्युतम् ।
तमःफलं महारूपं सुखदुःखादिहेतु च ॥ ४३ ॥

सर्वरूपपरब्रह्मविज्ञानस्य हि कारणम् ।
ब्रह्मादिस्थानवाच्यं स्यात्त्याज्यलक्षणलाक्षितम् ॥ ४४ ॥

एवमात्मपरब्रह्मविज्ञानादेव योगिनः ।
विधूय पुण्यपापे च संसारावश्यके पुनः ॥ ४५ ॥

निरञ्जनाश्च शान्ताश्च सामीप्यं ब्रह्मणः परम् ।
भजन्ति साम्यवाच्यञ्च तदेव परमं पदम् ॥ ४६ ॥

आत्मानात्मनोर्योगेन नित्येन चाखिलं जगत् ।
वर्धते च यथाभावमेवं ज्ञेयं मनीषिभिः ॥ ४७ ॥

सांख्यानां ध्याननिष्ठानां कर्मठानां यतात्मनाम् ।
श्रेष्ठा कैवल्यनिष्ठा स्यादिति कैवल्यभाषितम् ॥ ४८ ॥

अथाष्टमोऽध्यायः ।

अथातश्चाष्टमाध्याये श्रीकृष्णेन महात्मना ।
धर्मः कैवल्यनिष्ठस्य तदन्यस्य च वर्ण्यते ॥ ४९ ॥

अत्र कैवल्यनाथस्य ह्यात्मनः परमात्मनः ।
ब्रह्मणः सर्वरूपस्य वेत्ता यः समभाववान् ॥ ५० ॥

कालदेशोचितं कर्म सर्वं सांसारिकञ्च यत् ।
असङ्गेन च कुर्वन्सो ह्युत्तमो दैवभाववान् ॥ ५१ ॥

यः कामेन तदुत्पन्नैः दोषैश्चापि प्रपीडितः ।
अनात्मविद्गुणैर्बद्धः सोऽसुरः परिकथ्यते ॥ ५२ ॥

आसुरं भावमापन्नो नष्टबुद्धिः पतेदधः ।
दैवसत्वसमाविष्टः सामीप्यं ब्रह्मणोऽश्नुते ॥ ५३ ॥

अथ नवमोऽध्यायः

ततश्च नवमाध्याये साधनत्रयमुच्यते ।
ब्रह्मविज्ञानिनस्तस्य तथाऽन्यस्य महात्मना ॥ ५४ ॥

तथा हि परमे तस्मिन्ब्रह्मणि स्वात्मयोगतः ।
स्वभावाश्च त्रयः सन्ति ब्रह्मशक्तिविवर्धिताः ॥ ५५ ॥

शास्त्राणां भिन्नरूपत्वं बुध्यते कालदेहतः ।
अजानतां हि शास्त्रार्थं संसारस्य तथाऽऽत्मनः ॥ ५६ ॥

व्यवसाये च महति स्वभावो हेतुरुच्यते ।
तस्मात्स्वभावानुरूपं सर्वं सञ्जायते क्रमात् ॥ ५७ ॥

पुरुषस्य हि या श्रद्धा सा ब्राह्मी शक्तिरुच्यते ।
श्रद्धाजातस्वभावस्तु सर्वकार्यक्षमो भवेत् ॥ ५८ ॥

प्रवृत्तस्यात्मनः श्रद्धा स्वपरा-सत्वजा च या ।
सात्विकी सा ब्रह्मशक्तिरिति ज्ञेया सनातनी ॥ ५९ ॥

या च स्यात्संसारपरा राजसी सा प्रकीर्त्यते ।
तृतीया सा ब्रह्मशक्तिः विना चात्मधिया हि यां ॥ ६० ॥

केवलं स्वप्रधानोत्था तामसीति निगद्यते ।
तुरीया च महाश्रद्धा समाहारपरा मता ॥ ६१ ॥

एकाक्षरपरा विद्या बोध्या चास्ति ततो बुधाः ।
श्रद्धानुरूपं ज्ञानञ्च तपः कर्म च दैहिकम् ॥ ६२ ॥

दैविकञ्च तथा दानमाहारो भक्तिरेव च ।
संभवत्येवमखिलमिति कृष्णमुखोदितम् ॥ ६३ ॥

अथ दशमोऽध्यायः

ततश्च दशमाध्याये ह्यात्मनो बन्ध उच्यते ।
येनायं द्वंद्वजान्भोगान्भुङ्क्ते बद्धश्च देहिकान् ॥ ६४ ॥

गुणत्रयी महामाया ह्यजा जाता विभाव्यते ।
सैव बध्नाति देहेऽस्मिन्नात्मानमजमव्ययम् ॥ ६५ ॥

सहजा ब्रह्मणो या हि सा देवी परिकथ्यते ।
प्रवृत्तेश्च निवृत्तेश्च व्यवसायस्य साधनम् ॥ ६६ ॥

द्वितीया सा गुणमयी प्रोच्यते शुद्धयोगिभिः ।
कार्योपयोगिनी या तु पुरुषस्याधिकारिणः ॥ ६७ ॥

एतच्छब्दार्थभूता च तृतीया परिकथ्यते ।
सर्वाश्चैताः ब्रह्मणः स्युः शक्तयश्चेति बुध्यते ॥ ६८ ॥

देवी च ब्रह्मदृष्टीनां मुमुक्षूणां महात्मनाम् ।
गुणत्रयमयी चान्या सर्वसंसारिणां मता ॥ ६९ ॥

तथाऽन्या ह्यवतीर्णानां ब्रह्मांशानां विशेषतः ।
व्यवसायसाधनं स्यादिति वेद्यं मनीषिभिः ॥ ७० ॥

गुणत्रयमयी या हि सा श्रद्धेति निगद्यते ।
एतासां तरणं यच्च प्राप्तिरित्येव बुध्यते ॥ ७१ ॥

मायैव ज्ञानहेतुः स्यादज्ञानस्य च कर्मणाम् ।
माययैव परं ब्रह्म तथाऽऽत्मा च जगत्तथा ॥ ७२ ॥

व्यवसायपरश्चास्ति ततः सेयं मनीषिणा ।
स्वात्मविज्ञानतस्तार्या तीर्णमायो महामतिः ॥ ७३ ॥

सामीप्यं ब्रह्मणस्तस्य सुखेनैति न चान्यथा ।
इति मायागीतया हि बन्धः प्रोक्तो हि चात्मनाम् ॥ ७४ ॥

बद्ध एव स्वकीयं हि व्यवसायं करोति च ।
स्वकीयव्यवसायस्य पूर्तौ सत्यां विमुच्यते ॥ ७५ ॥

अथैकादशोऽध्यायः

अथ चैकादशेऽध्याये बन्धान्मोक्षस्तु कथ्यते ।
व्यवसायपरस्यास्य पुरुषस्य विपश्चितः ॥ ७६ ॥

अन्ते स्वव्यवसायस्य सर्वसंसारिणां हि सः ।
परप्राप्तेः साधनञ्च सिद्धिरूपश्च कथ्यते ॥ ७७ ॥

योगनिष्ठासुसाध्यश्च तुरीयोऽर्थः स देहिनाम् ।
शुद्धमार्गान्निर्गतो यो योगी नावर्तते पुनः ॥ ७८ ॥

व्यवसायं स्वकीयञ्च कर्तुं संसारमण्डले ।
शुद्धाशुद्धौ च मार्गौ द्वौ वर्तेते शाश्वतौ किल ॥ ७९ ॥

बुध्या धृत्या शुद्धया हि विमुञ्चन्देहमण्डलम् ।
समाप्तव्यवसायश्च ब्रह्मलोकादिसंज्ञकम् ॥ ८० ॥

स्वात्मयोगपरः शान्तो ब्रह्मशक्तिं प्रपद्यते ।
ब्रह्मशक्तिसमाविष्टो ब्रह्मकार्याय सज्जते ॥ ८१ ॥

उत्तमस्य सुखस्येह वेत्ता त्यक्तपरिग्रहः ।
ईश्वरं सर्वभूतानां वसन्तं हृदि चाव्ययम् ॥ ८२ ॥

विज्ञाय योगसंसिद्धः सामीप्यं ब्रह्मणोऽश्नुते ।
सारूप्यं चाथ सायुज्यं सालोक्यञ्चैव ये विदुः ॥ ८३ ॥

तत्तत्वं संग्रहेणैव वक्ष्यामि श्रुतिचोदितम् ।
ब्रह्मस्वभावविज्ञानाद्या च लोकाधिकारिता ॥ ८४ ॥

प्राप्तिस्तस्यास्तु सारूप्यमिति नारायणोदितम् ।
तत्तत्काले तु जगतां स्वस्तये शुद्धभक्तितः ॥ ८५ ॥

ब्रह्मांशं यं प्रपद्यन्ते तत्सायुज्यमितीर्यते ।
ज्ञानदेहेन सर्वत्र सञ्चारो यश्च योगिनाम् ॥ ८६ ॥

सालोक्यं तत्प्रचक्षन्ते शुद्धविद्याधिकारिणः ।
संसारमण्डलं त्यक्त्वा प्राक्तनं शुद्धयोगतः ॥ ८७ ॥

प्राप्तिः परपदस्यैव तत्सामीप्यं प्रकथ्यते ।
सामीप्यं शुद्धयोगेन सालोक्यं शुद्धज्ञानतः ॥ ८८ ॥

शुद्धभक्त्या च सायुज्यं सारूप्यं शुद्धकर्मणा ।
सामीप्यं सर्वतः श्रेष्ठं तेन सर्वं समश्नुते ॥ ८९ ॥

अथ द्वादशोऽध्यायः

ततश्च द्वादशेऽध्याये वेद्यं यच्च मुमुक्षुभिः ।
ब्रह्मस्वरूपं तच्चात्र सप्रकारमुदाहृतम् ॥ ९० ॥

एकं यच्च परब्रह्म सर्वातीतं हि तद्भवेत् ।
न ध्येयं नैव च ज्ञेयं न च वाच्यं सनातनम् ॥ ९१ ॥

आत्मानात्मशरीरश्च ब्रह्म तत्परमं भवेत् ।
जगज्जन्मादिकानान्तु कारणश्चेति बुध्यते ॥ ९२ ॥

प्रोक्ताः सर्वे पदार्थाश्च ब्रह्मण्येव भवन्ति हि ।
परस्माद्ब्रह्मणस्तस्माज्जगत्सर्वं हि जायते ॥ ९३ ॥

परमात्मा परब्रह्म परात्मात्मा सनातनः ।
जीवश्चेति प्रसिद्धाश्च तत्तत्संसारनायकाः ॥ ९४ ॥

तत्तन्नायकदासश्च सामीप्यं ब्रह्मणोऽश्नुते ।
ब्रह्मशक्तिस्फुलिङ्गाश्च सर्वे जीवादयो मताः ॥ ९५ ॥

स्फुलिङ्गो लोक इत्येके देह इत्यपरे बुधाः ।
आत्मैव सर्वलोकेशश्चेति नारदभाषितम् ॥ ९६ ॥

फलं स्यात्तस्य सामीप्यं पञ्चमस्य परेशितुः ।
ब्रह्मसामीप्यमापन्नः शुद्धसङ्कल्पनायकः ॥ ९७ ॥

पूतो मेध्यः पवित्रश्च तत्पश्यति परं पदम् ।
एवं त्रिधा विशुद्धायाः प्रकृतेरवगाहनात् ॥ ९८ ॥

ब्राह्मी विभूतिभिर्युक्तो जगद्रक्षणकर्मणि ।
प्रवर्तते स्वभावेन शुद्धतेजस्स्वरूपवान् ॥ ९९ ॥

अहं तथा जगत्कर्ता पाता संहारकस्तथा ।
शुद्धाधिकारमापन्नः देवो नारायणो विभुः ॥ १०० ॥

आत्मनात्माविवेकाच्च त्याज्योपादेयमोहतः ।
ममैवांशो जीवलोकः जीवभूतः सनातनः ॥ १०१ ॥

प्रकृत्याऽशुद्धयोपेतः विमूढो ब्रह्मणः पथि ।
यश्च स्यात्तदहन्तस्मै विज्ञानं प्रददामि च ॥ १०२ ॥

तस्माज्जातेन यज्ञेन जगत्क्षेमङ्करेण हि ।
लोकः सामीप्यमश्नाति पश्य मे योगमैश्वरम् ॥ १०३ ॥

इति ब्रह्मस्वरूपञ्च साधिकारं विवर्ण्य हि ।
पार्थाय तस्मै प्रददौ दिव्यं ज्ञानविलोचनम् ॥ १०४ ॥

तेन पार्थः परं रूपमपश्यत्कृष्णाविग्रहे ।
सञ्जयो धृतराष्ट्राय तच्चाह प्रियदर्शनः ॥ १०५ ॥

ततः पार्थेन भगवान्प्रार्थितो मानुषं वपुः ।
पुनः स्वीकृत्य विभवं स्वकीयं चावदत्तदा ॥ १०६ ॥

द्वादशाध्यायभावो हि चैवं वेद्यो मनीषिभिः ।

अथ त्रयोदशोऽध्यायः

अनन्तरे तु चाध्याये विभूतिः ब्रह्मणः परा ॥ १०७ ॥

त्रयोदशे विशेषेण ह्युच्यते कृष्णयोगिना ।
पदार्थेषु च सर्वेषु यद्रत्नं ब्रह्मणः परम् ॥ १०८ ॥

रूपन्तदिति विज्ञेयमिति भूतिः प्रदर्शिता ।
व्यवसायपरैर्वेद्या ब्रह्मभूतिः सनातनी ॥ १०९ ॥

अथ चतुर्दशोऽध्यायः

ततश्चतुर्दशेऽध्याये ब्रह्मणः परमात्मनः ।
विभूतीनाञ्च सर्वासामाप्तये कृष्णयोगिना ॥ ११० ॥

प्राणायामाभिधो योगः प्रोक्तः साङ्गो महर्षयः ।
व्यवसायपरैश्चैव सर्वसंसारिभिस्स्वयम् ॥ १११ ॥

आत्मविज्ञानहेतुश्च ब्रह्मयोगविवर्धनः ।
सेव्योऽस्त्यवश्यमात्मा हि योगेनानेन पूज्यते ॥ ११२ ॥

प्रवृत्तमञ्जसा नीतमिन्द्रियैर्विषयग्रहैः ।
मानसं शुद्धयोगेन ह्यात्मना सह योजयेत् ॥ ११३ ॥

एवं योगेन चात्मानं चेतसाऽनन्यगामिना ।
पश्यन्भुङ्क्ते ब्रह्मणस्ता विभूतीर्युक्तमानसः ॥ ११४ ॥

इति प्राणायामयोगरहस्यार्थः प्रकाशितः ।
मार्गादस्माच्च्युतो यश्च योगी कालवशानुगः ॥ ११५ ॥

शुद्धयोनिं समापन्नः श्रीमान्भुङ्क्ते परं सुखम् ।
योगश्चैवं सुकथितो ह्यध्यायेऽस्मिन्महात्मना ॥ ११६ ॥

अथ पञ्चदशोऽध्यायः

ततः पञ्चदशेऽध्याये पार्थसूतेन विष्णुना ।
अन्तरात्मात्मभावस्य देवस्य परमात्मनः ॥ ११७ ॥

आत्मभूतिप्रदत्वेन ह्युपास्यस्य मुमुक्षुभिः ।
स्वरूपं सप्रकारं यत्सर्वबीजं तदुच्यते ॥ ११८ ॥

परमात्मा ब्रह्मभावो जगत्कारणमुच्यते ।
क्षराक्षरादतीतश्च स भवेत्पुरुषोत्तमः ॥ ११९ ॥

सर्वतेजस्स्वरूपश्च वासुदेवो जगद्गुरुः ।
परापराभ्यां विद्याभ्यां संस्तुतो दहरेश्वरः ॥ १२० ॥

समभावैर्गुणातीतैः समदुःखसुखैस्सदा ।
उपास्यश्चेति विज्ञेयस्तन्निष्ठानां परायणम् ॥ १२१ ॥

न कर्मणा हि मनसा ज्ञानेन च पुमान्परः ।
आत्मा सेव्यो जगत्साक्षी ह्यविकारो निरञ्जनः ॥ १२२ ॥

केवलं समभावेन योगेनाऽयं विभाव्यते ।
इति पञ्चदशाध्यायभावो वेद्यो मनीषिभिः ॥ १२३ ॥

अथ षोडशोऽध्यायः

ततश्च षोडशेऽध्याये ह्यविकारस्य वस्तुनः ।
सर्वप्रकृतिमूलस्य ब्रह्मणो रूपमुच्यते ॥ १२४ ॥

अक्षरं ब्रह्मणो रूपं प्रथमं परिबुध्यते ।
जीवरूपं द्वितीयं स्यात्तृतीयं ह्यात्मनामकम् ॥ १२५ ॥

परमात्मस्वरूपं हि तुरीयं कथ्यते बुधैः ।
स्वरूपं पौरुषं यच्च पञ्चमं हि तदुच्यते ॥ १२६ ॥

अक्षरं ब्रह्म यच्चोक्तं षट्प्रकारविभूतिमत् ।
षट्क्रमः कारणं दिव्यमुपास्यं स्वात्मयोगिभिः ॥ १२७ ॥

तदेव सर्वकार्येषु तत्तत्सांसारिकेषु च ।
विज्ञाय स्वात्मयोगेन परमं ज्ञानमश्नुते ॥ १२८ ॥

इति चाक्षरगीतायां कृष्णेन परमात्मना ।
स्वरूपं सप्रकारञ्च प्रोक्तं वै परमात्मनः ॥ १२९ ॥

अथ सप्तदशोऽध्यायः

ततः सप्तदशेऽध्याये ब्रह्मणः परमात्मनः ।
सर्वस्वभावयुक्तस्य विज्ञानार्थं परात्मना ॥ १३० ॥

राजविद्या योगविद्या शुद्धा सर्वफलप्रदा ।
उच्यते साधिकारश्च विज्ञेयाऽसौ मुमुक्षुभिः ॥ १३१ ॥

अथाष्टादशोऽध्यायः

ततश्चाष्टादशेऽध्याये कृष्णेन च महात्मना ।
शुद्धं परमहंसस्य श्रेष्ठविद्याधिकारिणः ॥ १३२ ॥

स्वरूपं च यथातत्वं प्रोच्यते तन्मुमुक्षुभिः ।
वेद्यमस्ति यथाभक्ति तद्वक्ष्यामि महर्षयः ॥ १३३ ॥

सर्वरूपं परं ब्रह्म सर्वकारणकारणम् ।
विज्ञाय संयतात्मा हि शुद्धयोगं समश्नुते ॥ १३४ ॥

योगं विचारं ध्यानञ्च कर्म शुद्धञ्च दैहिकम् ।
श्रेष्ठः परमहंसश्च राजविद्यासुशिक्षितः ॥ १३५ ॥

करोति समभावेन ततो याति परां गतिम् ।
सर्वासामेव सिद्धीनामाप्तये सर्वकर्मणाम् ॥ १३६ ॥

सिद्धये च यथायोगं ध्यानमेवावशिष्यते ।
इति परमहंसानान्निष्ठा वेद्या मुमुक्षुभिः ॥ १३७ ॥

राजविद्याविनीतानां शुद्धानां नियतात्मनाम् ।

अथैकोनविंशोऽध्यायः

ततस्त्वैकोनविंशे हि चाध्याये कृष्णयोगिना ॥ १३८ ॥

तेषां परमहंसानां निष्ठा या शुद्धलक्षणा ।
तस्याः संन्यासनिष्ठायाः स्वरूपमभिवर्णितम् ॥ १३९ ॥

संसारव्यवसायस्य श्रेष्ठस्य ह्युत्तरोत्तरम् ।
स्वीकारो योगरूपश्च संन्यास इति कथ्यते ॥ १४० ॥

अर्थानाञ्चैव सर्वेषां व्यक्तानां हि यथायथम् ।
एकस्मिन्शरणे स्थाने योगः संन्यास उच्यते ॥ १४१ ॥

सर्वमावश्यकं विद्यात्सर्वं ब्रह्मस्वभावजम् ।
इति संसारकार्याणि ये कुर्वन्ति मनीषिणः ॥ १४२ ॥

ते स्युः संन्यासिनः श्रेष्ठाः परमात्मपरायणाः ।
द्वंद्वभावफलासक्ताः कायक्लेशपरायणाः ॥ १४३ ॥

चरन्ति द्विविधं कर्म ये ते स्युर्मध्यमा मताः ।
संसारव्यवसायस्य नियतं साधनञ्च यत् ॥ १४४ ॥

कर्मादिकं धुन्वते ये ते वै संन्यासिनोऽधमाः ।
संन्यासिनां हि सर्वेषां ज्ञाननिष्ठैव चोदिता ॥ १४५ ॥

अथ विंशोऽध्यायः

ततश्च विंशे ह्यध्याये परमात्मपरायणैः ।
संन्यासिभिर्योगिभिश्च वेद्यस्यैवात्मनश्च हि ॥ १४६ ॥

स्वरूपं वर्ण्यते तच्च सर्वमूलं सनातनम् ।
कोटिसूर्यप्रकाशश्च कृष्णेन हि महात्मना ॥ १४७ ॥

अनादिरयमात्मा स्यात्क्षीरवर्णो निरीश्वरः ।
भुञ्जानश्च सुखं दुखं सर्वं प्रकृतिजं गुणैः ॥ १४८ ॥

शुद्धः शुक्रो जगत्साक्षी जगत्कर्ता प्रभाकरः ।
समः सर्वेषु भूतेषु पूर्णस्तिष्ठति निर्मलः ॥ १४९ ॥

अजानन्तश्च तं देवं सर्वोपास्यं सनातनम् ।
तापत्रयाभिभूताश्च न पश्यन्ति परं पदम् ॥ १५० ॥

योगिनामपि सर्वेषामन्येषां भावितात्मनाम् ।
काम एव महाशत्रुर्देहस्थःसर्वदेहिनाम् ॥ १५१ ॥

वध्यः स्याज्ज्ञानिभिर्नित्यं प्रेप्सुभिश्च परं पदम् ।
जीवस्य जृंभणं ज्ञानं सर्वकारणमुच्यते ॥ १५२ ॥

तन्मूलकं कर्म सर्वमतो ज्ञानञ्च कर्म च ।
अन्वितं ह्यात्मनोऽधीनमतो ह्यात्मा विचारितः ॥ १५३ ॥

विद्वानेवं स्वमात्मानं ब्रह्मप्रतिनिधिं गुरुम् ।
ब्रह्मणः परमं साम्यमेति सामीप्यधर्मवत् ॥ १५४ ॥

अथैकविंशोऽध्यायः

अथैकविंशे ह्यध्याये स्तूयते प्रकृतिः परा ।
आत्मनश्च ह्यधिष्ठानं क्षेत्रं तद्वै महात्मना ॥ १५५ ॥

सप्रकारं सपुरुषं साधुलक्षणलक्षितम् ।
इच्छामूलं हि सा चास्ति स्वसंकल्पवपुष्मती ॥ १५६ ॥

व्यवसायाश्च सर्वेऽपि क्षेत्रे ह्यस्मिन्भवन्ति हि ।
ब्रह्मशक्तिस्वरूपा च सा देवी प्रकृतिर्मता ॥ १५७ ॥

विद्वानेवमजां देवीमात्मानञ्चाक्षरं प्रभुम् ।
भूतप्रकृतिनिर्मुक्तः स्वसंकल्पे महीयते ॥ १५८ ॥

अथ द्वाविंशोऽध्यायः

द्वाविंशे च ततोऽध्याये श्रीकृष्णेन महात्मना ।
प्रकृतौ समवेतानां कर्मणामसतां सताम् ॥ १५९ ॥

स्वरूपं सप्रकारञ्च साधिकारन्निरूपितम् ।
एतन्मुमुक्षुभिर्वेद्यं कर्मसार्थक्यसिद्धये ॥ १६० ॥

अथ त्रयोविंशोऽध्यायः

त्रयोविंशे ततोऽध्याये ज्ञानकर्मसमाश्रया ।
आत्मानात्मपरा भक्तिः मध्यमानां सुखावहा ॥ १६१ ॥

जिज्ञासूनां परं ब्रह्म तीर्थानां भावितात्मनाम् ।
व्याख्यास्यते भगवता वासुदेवेन धीमता ॥ १६२ ॥

अथ चतुर्विंशोऽध्यायः

चतुर्विंशे ततोऽध्याये सर्वेषां कारणं परम् ।
ज्ञानं सर्वसमाहारपरं विज्ञानिनां हितम् ॥ १६३ ॥

ईशानः सर्वविद्यानां देवश्चात्मा सनातनः ।
विद्याधिकारिणश्चैव सर्वे चैते महात्मना ॥ १६४ ॥

तद्विद्यामहिमा चैव सप्रकारं निरूपिताः ।
एतद्वेद्यं विशेषेण योगिनामयनं परम् ॥ १६५ ॥

अथ पञ्चविंशोऽध्यायः

पञ्चविंशे ततोऽध्याये योगदेवीपतिःप्रभुः ।
बदरीशो नरसखः लोकप्रतिनिधिर्नरम् ॥ १६६ ॥

लोकभावनयाऽभावानिष्ठामास्थाय यत्नतः ।
नटन्तं शोचमानञ्च पापभीत्या स्वसन्निधौ ॥ १६७ ॥

लोकशिक्षास्वरूपञ्च कालदेशजनोचितम् ।
जिज्ञासुं शुद्धधर्मञ्च स्वात्मानं शरणं गतम् ॥ १६८ ॥

पार्थं स्वांशं समामन्त्र्य योगी च भगवान्परः ।
नारायणः कृष्णरूपः त्रयोविंशतिभिः स्वयम् ॥ १६९ ॥

गीताभिः सर्वधर्मांश्च संसारव्यवसायदान् ।
जगाद तत्वयोगेन श्रुतिमूलान्सनातनान् ॥ १७० ॥

अस्मिन्तेषां समाहारो योगात्मा हि निगद्यते ।
श्लोकैर्नियतसंख्यैश्च क्रमादेव स चोच्यते ॥ १७१ ॥

प्राप्यानाञ्च पुमर्थानां मोक्षस्तु परमः स्मृतः ।
कोऽसौ मोक्ष इति प्रश्ने भ्रमन्ति भुवि वै जनाः ॥ १७२ ॥

भुक्तभोगस्य यस्त्यागो व्यवसायस्य चात्मनः ।
संसारस्य च संन्यासः मोक्ष इत्युच्यते बुधैः ॥ १७३ ॥

बीजं गृहीत्वैव पुनः परं यान्ति मुमुक्षवः ।
बीजे तस्मिन्श्च शुद्धानि ह्यष्टतत्वानि भान्ति च ॥ १७४ ॥

परं प्राप्तस्य पुंसश्च व्यवसायपरस्य हि ।
शुद्धबीजेनैव पुनः व्यवसायः परो भवेत् ॥ १७५ ॥

तस्मात्संसारिभिर्नित्यं बीजशुद्धिर्यथामति ।
कर्तव्येति हि शास्त्रार्थः सा द्विधा भाति शास्त्रतः ॥ १७६ ॥

संन्यासः प्रथमा शुद्धिः द्वितीया त्याग उच्यते ।
व्यवसायान्तरे बीजदोषनाशाय वै पुनः ॥ १७७ ॥

तदेतौ विहितौ तौ च योगादेव हि नान्यथा ।
समाहाराभिधो योगस्ततोऽत्र हि निगद्यते ॥ १७८ ॥

श्रीमान्नारायणो देवः कालरूपः सनातनः ।
गुणाविष्टस्य लोकस्य भिन्नस्य च परस्परम् ॥ १७९ ॥

वीक्ष्य स्वभावमैक्यञ्च ह्यनुशास्ति जगत्त्रयम् ।
सुखदुःखसमत्वञ्च देवो नारायणो विभुः ॥ १८० ॥

स्वावतारेण लोकांश्च शिक्षयत्यत्र योगजम् ।
अमृतत्वकारणञ्च भेदबुद्धिप्रणाशजम् ॥ १८१ ॥

ततो नारायणो देवः शुद्धसङ्कल्पनायकः ।
स्वनियुक्तैर्महाभागैः शुद्धैर्लोकाधिकारिभिः ॥ १८२ ॥

बुद्धिमेकामवष्टभ्य व्यवसायपरस्य च ।
लोकस्य धर्मनिष्ठाञ्च ह्यवतारयति स्वयम् ॥ १८३ ॥

ततः स भगवान्देवो लोकान्योगपरां पुनः ।
आत्मावगाहिनीं धर्मनिष्ठां कर्मस्वाशिक्षयत् ॥ १८४ ॥

अथ नारायणो देवः दिव्यकारणमीतया ।
उक्तमर्थं विशेषेण चैवमेवाह योगतः ॥ १८५ ॥

करणङ्कारणं कर्तृ ह्युपायं प्राप्यमेव च ।
ब्रह्मैवास्ति ततः सर्वं कारणं ब्रह्म कथ्यते ॥ १८६ ॥

कैवल्यार्थं ततश्चैवमाह नारायणो विभुः ।
कारणस्यैव विज्ञानाद्वस्तुनः परमात्मनः ॥ १८७ ॥

आत्मानात्मभ्रमान्मुक्तो परप्रेप्सुः प्रतिष्ठते ।
इति श्लोकैश्च षड्भिस्तु ज्ञाननिष्ठा प्रसादिता ॥ १८८ ॥

स्वरूपगीतया योऽर्थः व्याख्यातश्च महात्मना ।
श्लोकेऽस्मिन्सप्तमे सोऽयमुक्तोऽन्तर्मुखलक्षणः ॥ १८९ ॥

श्लोकेऽस्मिन्नष्टमे ह्युक्तः साधनत्रयगीतया ।
योऽर्थः कृष्णेन योगार्थः सोऽयश्चान्तर्मुखोदयः ॥ १९० ॥

व्याख्यातोऽस्ति यथातत्वं स च वेद्यो मुमुक्षुभिः ।
विज्ञानादस्य शान्तिं वै योगिनो यान्त्यनुत्तमाम् ॥ १९१ ॥

ततश्च मायामोक्षाभ्यां गीताभ्यां योऽर्थ उच्यते ।
तत्संग्रहश्च नवमे श्लोके ह्युक्तो महात्मना ॥ १९२ ॥

गुणत्रयात्समुत्पन्नं कल्मषं यच्च तापदम् ।
तन्मायेति च विख्यातं त्रिविधा सा च कथ्यते ॥ १९३ ॥

यश्च मुक्तः प्रशान्तात्मा स भुङ्क्ते शाश्वतं सुखम् ।
सौमनस्यं गुणान्मोको मोक्ष इत्यवधार्यताम् ॥ १९४ ॥

ततश्च दशमे श्लोके ब्रह्मगीतार्थ उच्यते ।
तत्र प्राधान्यतः साधु ह्यधिकार्येव वर्णितः ॥ १९५ ॥

ततश्चैकादशे श्लोके भगवान्भूतभावनः ।
अनुत्तमं यद्भूतेषु ग्राह्यं तदिति निर्णयः ॥ १९६ ॥

तद्विज्ञान्यपि सुश्लाघ्यः तत्प्रेप्सुश्च ततोऽधिकः ।
स च दिव्यां ब्रह्मभूतिं माशब्दार्थां महेश्वरीम ॥ १९७ ॥

सरस्वतीं महालक्ष्मीं दुर्गां कालिञ्च दक्षिणाम् ।
श्रीविद्यां योगविद्याञ्च समाराध्य पुनः पुनः ॥ १९८ ॥

योगी सर्वेषु कालेषु व्यवसायेषु च स्वतः ।
सर्वदेहेषु शान्तात्मा समबुद्धिर्विशिष्यते ॥ १९९ ॥

इति दिव्यार्थदां ब्राह्मीं जगाद परमो गुरुः ।
विद्या चेयं योगिसेव्या चेति शुद्धैरुदीर्यते ॥ २०० ॥

इति द्वितीयषट्केण देवी सङ्कल्पबिंबिता ।
संस्तुताऽस्ति यथायोगं योगिभ्यः कृष्णमूर्तिना ॥ २०१ ॥

ततः श्लोकद्वयेनैव कृष्णो नारायणो विभुः ।
तं प्राणायामगीतार्थं व्याजहार स्वयोगतः ॥ २०२ ॥

ततश्चतुर्दशे श्लोके कृष्णदेवो महर्षयः ।
परमात्मस्वरूपञ्च व्याजहार सलक्षणम् ॥ २०३ ॥

ततः पञ्चदशे श्लोके ब्रह्म यच्चाक्षरं स्तुतम् ।
समाहारस्वरूपञ्च तच्च साधु निगद्यते ॥ २०४ ॥

ततश्च षोडशे श्लोके राजविद्या महात्मना ।
समन्त्रबीजध्याना च व्याख्याता तत्वयोगतः ॥ २०५ ॥

ततः सप्तदशे श्लोके ज्ञानदात्रा महात्मना ।
सत्वविज्ञानरूपा च हंसनिष्ठा सुशिक्षिता ॥ २०६ ॥

ततश्चाष्टादशे श्लोके देवो नारायणो यतिः ।
आह संन्यासनिष्ठाञ्च ह्यपरान्तत्वमुद्रया ॥ २०७ ॥

एवं तृतीयषट्केण श्लोकेन हि महात्मना ।
कर्मनिष्ठा च कथिता सर्वेषां भावितात्मनाम् ॥ २०८ ॥

ततश्चैकोनविंशे च ह्यध्याये यदुनन्दनः ।
योगेनात्मोपासनाञ्च साधिकारं जगाद हि ॥ २०९ ॥

ततः श्लोके च विंशे हि त्रैविध्यं जगतस्तथा ।
विद्यानां कर्मणाञ्चापि ह्यजाजानां निरूपितम् ॥ २१० ॥

एकविंशे ततः श्लोके योगिनां कर्मिणां पुनः ।
कर्मनिष्ठा निगदिता समनिष्ठा महात्मना ॥ २११ ॥

द्वाविंशे च ततः श्लोके ध्येयः स भगवानजः ।
भक्तिसाध्यं परं ब्रह्मभक्तिं ताञ्चाह योगिराट् ॥ २१२ ॥

त्रयोविंशे ततः श्लोके चात्मनिग्रस्य वै पुनः ।
प्रशस्ता ज्ञाननिष्ठा च साङ्गं साधु निरूपिता ॥ २१३ ॥

चतुर्विंशे ततः श्लोके योगिनां परमो गुरुः ।
योगगीतारहस्यार्थं चैवं पार्थाय चायदत्त ॥ २१४ ॥

अनुद्भूतवस्तुभेदः समाहार इति श्रुतः ।
समाहारे हि चैकत्वं शब्दसिद्धं महात्मनाम् ॥ २१५ ॥

यथा सांसारिको भेदः सहजस्सर्ववस्तुनः ।
तथाऽभेदश्च सहजः सर्वदेमौ सनातनौ ॥ २१६ ॥

तस्माद्धि भेदाऽभेदौ च ब्रह्मणो हि स्वभावजौ ।
त्रैगुण्यविषया वेदाः भेदे जाग्रति देहिनाम् ॥ २१७ ॥

ज्ञानं मनस्तथा कर्म चैतानि गुणजानि हि ।
विना ब्रह्म नेतिनेतिश्रुतिसिद्धं परात्परम् ॥ २१८ ॥

परमात्मात्मजीवानामक्षरस्य च सन्ति हि ।
तस्मादेते गुणपरा व्यवसायेषु जाग्रति ॥ २१९ ॥

तस्माद्वयश्च सर्वेऽपि तेषां भूतिन्तु चाग्रतः ।
ज्ञानं मनोकर्मभिश्च सद्भिः संप्राप्य यत्नतः ॥ २२० ॥

एकं मूलं च यत्स्थानं शुद्धं तच्च व्रजेमहि ।
तद्बुद्धयस्तन्मनस्काः तत्कर्मनिरता बुधाः ॥ २२१ ॥

स्थिरमूलाः विशालाक्षाः लोकक्षेमकराः शुभाः ।
सर्वमावश्यकं मत्वा कर्म कुर्मो यथासुखम् ॥ २२२ ॥

सङ्कल्पं च तथा विज्ञाः भवेमहि वयं श्रिया ।
एवं स्थितानां दासानां स्वव्यवसायवेधकः ॥ २२३ ॥

य: शत्रुः सर्वदेहस्थःतमात्मा बलवान्शुचिः ।
विनाशयाति योगेन शुद्धेनैकेन वर्चसा ॥ २२४ ॥

इति चतुर्विंशातिभिर्गीताभिर्भगवानजः ।
उक्त्वा ततो व्याजहार कर्तव्यं तत्फलं च सः ॥ २२५ ॥

ततः पार्थश्चैवमुक्तः कृष्णेन ससमञ्जसम् ।
अस्तौषीत्तं महात्मानं मित्रञ्च परमं गुरुम् ॥ २२६ ॥

परमात्मभूतिमन्तं वासुदेवं महेश्वरम् ।
योगदेवीपतिं शान्तं शङ्करं शिवमच्युतम् ॥ २२७ ॥

ततो यया च भगवान्ब्रह्मस्तुत्या स्तुतस्तदा ।
ताञ्च राज्ञे संजयश्च प्राह युक्तेन चेतसा ॥ २२८ ॥

ब्रह्मस्तुतौ च तस्यां हि पावनायां हि देहिनाम् ।
चतुर्विंशतिगीतानां संग्रहार्थः प्रदर्शितः ॥ २२९ ॥

एवं गीतासंग्रहार्थः नारायणमुखाच्छ्रुतः ।
एतद्विज्ञानिनस्सर्वे भुञ्जते सुखमुत्तमम् ॥ २३० ॥

गीताशास्त्रमिदं पुण्यं गायत्रीपादसंभवम् ।
लोकप्रतिनिधिस्थाने स्थितायार्ताय धीमते ॥ २३१ ॥

नारायणेन कृष्णेन चार्जुनाय प्रसादितम् ।
शुद्धशास्त्रमिदं पुण्यं ज्ञात्वा हि श्रियमश्नुते ॥ २३२ ॥

इति श्रीमहर्षिगोभिलविरचितः
गीतार्थसंग्रहः
संपूर्णः

ओं नमः श्रीपरमर्षिभ्यो योगिभ्यः

शुद्धधर्ममण्डलार्थसुपरिष्कृता

श्रीमद्भगवद्गीता

तत्र

गीतावतारनिरूपणं नाम

प्रथमोऽध्यायः ।

धृतराष्ट्र उवाच

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥ १ ॥

संजय उवाच

दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा ।
आचार्यमुपसङ्गम्य राजा वचनमब्रवीत् ॥ २ ॥

पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूम् ।
व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥ ३ ॥

अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् ।
पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम् ॥ ४ ॥

अयनेषु च सर्वेषु यथाभागमवस्थिताः ।
भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एवहि ॥ ५ ॥

अथोच्चैः संप्रहृष्टात्मा युक्तः शान्तनवोऽब्रवीत् ।
प्रीतिमान्हि दृढं कृष्णः पाण्डवेषु यशस्विषु ॥ ६ ॥

तस्माद्बिभेमि राजेन्द्र शमो भवतु पाण्डवैः ।
पृथिवीं भुंक्ष्व सहितो भ्रातृभिर्बलिभिर्वशी ॥ ७ ॥

नरनारायणौ देवाववज्ञाय नशिष्यसि ।
इत्येवं कथयन्राजन् भीष्मः शान्तनवो महान् ॥ ८ ॥

तस्य सञ्जनयन्हर्षं कुरुवृद्धः पितामहः ।
सिम्हनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान् ॥ ९ ॥

ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः ।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ॥ १० ॥

धार्तराष्ट्रबलं दृष्ट्वा युद्धाय समुपस्थितम् ।
अर्जुनस्य हितार्थाय कृष्णो वचनमब्रवीत् ॥ ११ ॥

श्रीभगवानुवाच

शुचिर्भूत्वा महाबाहो संग्रामाभिमुखे स्थितः ।
पराजयाय शत्रूणां दुर्गास्तोत्रमुदीरय ॥ १२ ॥

संजय उवाच

एवमुक्तोऽर्जुनः संख्ये वासुदेवेन धीमता ।
अवतीर्य रथात्पार्थः स्तोत्रमाह कृताञ्जलिः ॥ १३ ॥

अर्जुन उवाच

नमस्ते सिद्धसेनानि आर्ये मन्दरवासिनि ।
कुमारि कालि कापालि कपिले कृष्णपिङ्गले ॥ १४ ॥

भद्रकालि नमस्तुभ्यं महाकालि नमोऽस्तु ते ।
चण्डि चण्डे नमस्तुभ्यं तारिणि वरवर्णिनि ॥ १५ ॥

कात्यायनि महाभागे करालि विजये जये ।
शिखिपिञ्छध्वजधरे नानाभरणभूषिते ॥ १६ ॥

अट्टशूलप्रहरणे खड्गखेटकधारिणि ।
गोपेन्द्रस्यानुजे ज्येष्ठे नन्दगोपकुलोद्भवे ॥ १७ ॥

महिषासृक्प्रिये नित्यं कौशिकि पीतवासिनि ।
अट्टहासे कोकमुखे नमस्तेऽस्तु रणप्रिये ॥ १८ ॥

उमे शाकंबरि श्वेते कृष्णे कैटभनाशिनि ।
हिरण्याक्षि विरूपाक्षि सुधूम्राक्षि नमोऽस्तु ते ॥ १९ ॥

वेदश्रुतिमहापुण्ये ब्रह्मण्ये जातवेदसि ।
जंबूकटकचैत्येषु नित्यं सन्निहितालये ॥ २० ॥

त्वं ब्रह्मविद्या विद्यानां महानिद्रा च देहिनाम् ।
स्कन्दमातर्भगवति दुर्गे कान्तारवासिनि ॥ २१ ॥

स्वाहाकारः स्वधा चैव कला काष्ठा सरस्वती ।
सावित्री वेदमाता च तथा वेदान्त उच्यते ॥ २२ ॥

कान्तारभयदुर्गेषु भक्तानाञ्चालयेषु च ।
नित्यं वससि पाताले युद्धे जयसि दानवान् ॥ २३ ॥

त्वं जंभनी मोहिनी च माया ह्रीः श्रीस्तथैव च ।
सन्ध्या प्रभावती चैव सावित्री जननी तथा ॥ २४ ॥

तुष्टिः पुष्टिर्धृतिर्दीप्तिश्चन्द्रादित्यविवर्धिनी ।
भूतिर्भूतिमतां संख्ये वीक्ष्यसे सिद्धचारणैः ॥ २५ ॥

स्तुताऽसि त्वं महादेवि विशुद्धेनान्तरात्मना ।
जयो भवतु मे नित्यं त्वत्प्रसादाद्रणाजिरे ॥ २६ ॥

संजय उवाच

ततः पार्थस्य विज्ञाय भक्तिं मानववत्सला ।
अन्तरिक्षगतोवाच गोविन्दस्याग्रतस्स्थिता ॥ २७ ॥

स्वल्पेनैव तु कालेन शत्रून्जेष्यसि पाण्डव ।
नरस्त्वमसि दुर्धर्ष नारायणसहायवान् ॥ २८ ॥

अजेयस्त्वं रणेऽरीणामपि वज्रभृतःस्वयम् ।
इत्येवमुक्त्वा वरदा क्षणेनान्तरधीयत ॥ २९ ॥

मोहादेतौ न जानन्ति नरनारायणावृषी ।
तव पुत्रा दुरात्मनः सर्वे मन्युवशानुगाः ॥ ३० ॥

यत्र धर्मो द्युतिः कान्तिर्यत्र ह्रीः श्रीस्तथा मतिः ।
यतो धर्मस्ततः कृष्णो यतः कृष्णस्ततो जयः ॥ ३१ ॥

ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ ।
माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः ॥ ३२ ॥

पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः ।
पौण्ड्रं दध्मौ महाशङ्खं भीमकर्मा वृकोदरः ॥ ३३ ॥

अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः ।
नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ॥ ३४ ॥

काश्यश्च परमेष्वासः शिखण्डी च महारथः ।
धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः ॥ ३५ ॥

द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते ।
सौभद्रश्च महाबाहुः शङ्खान्दध्मुः पृथक्पृथक् ॥ ३६ ॥

स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् ।
नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् ॥ ३७ ॥

अथ व्यवस्थितान् दृष्ट्वा धार्तराष्ट्रान् कपिध्वजः ।
प्रवृत्ते शस्त्रसम्पाते धनुरुद्यम्य पाण्डवः ॥ ३८ ॥

हृषीकेशं तदा वाक्यमिदमाह महीपते ।

अर्जुन उवाच

सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत ॥ ३९ ॥

यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान् ।
कैर्मया सह योद्धव्यमस्मिन्रणसमुद्यमे ॥ ४० ॥

योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः ।
धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः ॥ ४१ ॥

संजय उवाच

एवमुक्तो हृषीकेशो गुडाकेशेन भारत ।
सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् ॥ ४२ ॥

भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम् ।
उवाच पार्थ पश्यैतान्समवेतान्कुरूनिति ॥ ४३ ॥

तत्रापश्यत्स्थितान्पार्थः पितॄनथ पितामहान् ।
आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा ॥ ४४ ॥

श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि ।
तान्समीक्ष्य स कौन्तेयः सर्वान्बन्धूनवस्थितान् ॥ ४५ ।

कृपया परयाऽऽविष्टो विषीदन्निदमब्रवीत् ।

अर्जुन उवाच

दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम् ॥ ४६ ॥

सीदन्ति मम गात्राणि मुखं च परिशुष्यति ।
वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥ ४७ ॥

गाण्डीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते ।
न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ॥ ४८ ॥

निमित्तानि च पश्यामि विपरीतानि केशव ।
न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे ॥ ४९ ॥

अहो बत महत्पापं कर्तुं व्यवसिता वयम् ।
यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः ॥ ५० ॥

गुरूनहत्वा हि महानुभावान्
श्रेयो भोक्तुं भैक्ष्यमपीह लोके ।
हत्वाऽर्थकामांस्तु गुरूनिहैव
भुञ्जीय भोगान्रुधिरप्रदिग्धान् ॥ ५१ ॥

न चैतद्विद्मः कतरन्नो गरीयो
यद्वा जयेम यदि वा नो जयेयुः ।
यानेव हत्वा न जिजीविषामः
तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः ॥ ५२ ॥

कार्पण्यदोषोपहतस्वभावः
पृच्छामि त्वां धर्मसम्मूढचेताः ।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे
शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥ ५३ ॥

संजय उवाच

एवमुक्त्वाऽर्जुनः सङ्ख्ये रथोपस्थ उपाविशत् ।
विसृज्य सशरं चापं शोकसंविग्नमानसः ॥ ५४ ॥

इति श्रीभगवद्गीतायां योगब्रह्मविद्यायां
गीतावतारनिरूपणं नाम प्रथमोऽध्यायः ॥

अथ

नरनारायणधर्मगीता नाम

द्वितीयोऽध्यायः ।

संजय उवाच

तमुवाच हृषीकेशः प्रहसन्निव भारत ।
